दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-44 | 1 | दिसम्बर 14, 2024 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्दः ५१२५ हेमन्तऋतुः सूर्यदक्षिणायनम् मार्गशीर्षशुक्लचतुर्दशी तिथिः मार्गशीर्ष २९ प्रविष्ठांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशे सर्वकारीविद्यालयेषु छात्राणां संख्यायां न्यूनता,



3 उत्तराखण्डे संस्कृतशिक्षकाणां त्रिदिवसीयप्रशिक्षण-शिबिरम् आयोज्यते



4 उत्तरकाण्डम्! (पञ्चत्वारिंशः सर्गः) लवणासुरवधार्थं शत्रुघ्नं प्रति रामस्य आदेशः (तृतीयः खण्डः)




## संसदः रक्षणार्थं स्वप्राणान् त्यक्तान् वीरान् प्रति समग्रराष्ट्रेन वीरसैनिकेभ्यः श्रद्धाञ्जलिम् अर्पिता



एकाधिक-द्विसहस्र-तमे वर्षे दुरापादिते आतङ्कि-आक्रमणकाले संसदः रक्षणार्थं स्वप्राणान् त्यक्तान् वीरान् प्रति समग्रराष्ट्रम् तेभ्यः वीरसैनिकेभ्यः श्रद्धाञ्जलिम् अर्पितवान् । भयोत्पादक-आक्रमणे अष्टौ सुरक्षाकर्मिणः हुतात्माः अभवन् । हुतात्मान् स्मृत्य राष्ट्रपतिः द्रौपदीमुर्मूः, उपराष्ट्रपतिः जगदीप-धनखडः, प्रधानमन्त्री नरेन्द्र मोदी च उक्तवन्तः यत् तेषां वीरतायाः निःस्वार्थ-सेवायाः च कृते देशः सर्वदा कृतज्ञो वर्तते इति । निज-सन्देशे राष्ट्रपतिः आतङ्कवादात् निवारणार्थं भारतस्य अविचल-संकल्पं प्रत्यावर्तयत् तथा च आतङ्कवादस्य विरुद्धं राष्ट्रम् एकीकृतम् वर्तते इति अवधानं दत्तवती । उपराष्ट्रपतिः जगदीपधनखडः, लोकसभाध्यक्षः ओम् बिरलाः प्रधानमन्त्री नरेन्द्र मोदी, केन्द्रीय गृह-मन्त्री अमितशाहः च गतप्रातः नवदिल्ल्यां संसत्भवनपरिसरे हुतात्मानः प्रति पुष्पांजलिम् अर्पितवन्तः। पश्चात् स्वकीये सन्देशे प्रधानमन्त्रिणा निगदितं यत्, हुतात्मानां त्यागः राष्ट्रं सर्वदा प्रेरयिष्यति इति। लोकसभायां राज्यसभायां च सदस्याः वीर-सुरक्षा-कर्मिणां सम्मानार्थं मौनमपि आचरितवन्तः। राज्यसभायाः सभापतिः जगदीप-धनखडः अवदत् यत्, भयोत्पादकेभ्यः दुर्भावनापूर्ण-दुष्ट-योजनां निष्फलीकर्तुं सुरक्षाकर्मिणां दृढं शौर्यम् आसीत् इति। अध्यक्षः ओम्. बिरलाः अवदत् यत् अस्य दुःखद-आक्रमणस्य त्रयो विंशति-तम-वर्षपूर्ती सदनमेतत् आतङ्कवादं विरुद्ध्य दृढतया सङ्कल्पं पुनरुद्घाटयति इति । यदा लोकसभायाः कार्या-चरणं समारब्धं तावत् अध्यक्षेण ओम बिरला इत्यनेन कथितं यत् अस्मिन्नेव दिने संसदः सुरक्षाकर्मिणः अनुकरणीयवीरतायाः साहसस्य च परिचयं दत्वा आतङ्कीनां प्रयासं विफलं कृतवन्तः।

## बाङ्ग्लादेशे चिन्मय-कृष्णा-दासस्य प्रतिभूतये सर्वोच्चन्यायालयस्य वरिष्ठाधिवक्तुः याचिका स्वीकृता

बाङ्ग्लादेशे चटगांव-स्थितेन न्यायालयेन हिन्दू-पुजारिणः चिन्मय-कृष्णा-दासस्य प्रतिभूतये सर्वोच्च न्यायालयस्य वरिष्ठाधिवक्तुः याचिका स्वीकृता, परं न्यायाधीशेन याचिकायै शीघ्रं वादश्रवणस्य अनुमतिः नैव प्रदत्ता। वार्ताभिकरणाम् अनुसारेण बाङ्ग्लादेशस्य उच्चतम- न्यायालयस्य अधिवक्तुः मानवाधिकार-कार्यकर्तुः रबिन्द्र घोषस्य याचिका न्यायाधीशेन प्रपत्रेषु संरक्षिता । वादश्रवणाय च जनवरी मासस्य द्वितीयो दिवसः निर्धारितः। अवधेयं यत् बुधवासरे अपि न्यायालेन शीघ्रं प्रतिभूतेः वादश्रवणं निराकृतम्। न्यायालयेन उक्तं यत् बांग्लादेश सम्मिलितो सनातनी जागरोण जोते इत्यस्य प्रवक्त्रा चिन्मय-कृष्ण-दासेन याचिका प्रस्तोतुम् अधिवक्ता नैव अधिकृतः आसीत् ।

## तमिलनाडु-राज्ये वर्षा-कारणेन नैकेषु जनपदेषु जनजीवनं दुष्प्रभावितम्

तमिलनाडु-राज्ये वर्षा-कारणेन नैकेषु जनपदेषु जनजीवनं दुष्प्रभावितम्। तिरुनेलवेली, तिरुवल्लूर, कुड्डालोर, तेनकासी तंजावुरेषु अथ च अन्य क्षेत्रेषु प्रबला वृष्टिः सञ्जाता। अरियालुर-स्थले जलौघ-स्थितौ शिशुं समेत्य सप्त-जनानां जीवनं संरक्षितम् ।

## त्रीसाजॉली-गायत्रीगोपीचन्द्रयोः भारतीययुगलम् जापानदेशीयेन युगलेन पराजयं स्वीकृतवत्

बैडमिण्टनप्रतिस्पर्धायाम्, त्रीसाजॉली-गायत्रीगोपीचन्द्रयोः भारतीययुगलम् चीनदेशस्य हांग्चाउनगरे प्रचल्यमानायां महिलानां बी.डब्ल्यू-एफ्. वर्ल्ड-टूअर-प्रतिस्पर्धायां जापानदेशीयेन युगलेन पराजयं स्वीकृतवत्। भारतीययुगलमेतत् सप्तदश-एकविंशतिः त्रयोदश-एकविंशति च इत्यङ्कान्तराले पराजयम् अभिस्वीकृतवत्।

## छत्तीसगढ-राज्ये सुरक्षाबलैः सह जाते सङ्घर्षे द्वौ माओवादिनौ व्यापादितौ

छत्तीसगढ-राज्ये बिजापुर-जनपदस्य बसगुडा-क्षेत्रे सुरक्षाबलैः सह जाते सङ्घर्षे द्वौ माओवादिनौ व्यापादितौ। सुरक्षा-बलेन प्रहार-स्थलात् प्रबल-मात्रायां शस्त्राणि स्फोटकास्त्राणि च प्राप्तानि । अस्मिन् क्षेत्रे अन्वेषणाभियानं प्रचलति स्म

## बाङ्ग्लादेशः राष्ट्रहितं निध्याय तादृशोपायान् करिष्यति येन अल्पसङ्ख्यकाः तत्र सुरक्षिताः भवेयुः-विदेश-मन्त्री डॉ. एस.जयशङ्करः



विदेश-मन्त्री डॉ. एस.जयशङ्करः अवदत् आशास्यते यत् बाङ्ग्लादेशः राष्ट्रहितं निध्याय तादृशोपायान् करिष्यति येन अल्पसङ्ख्यकाः तत्र सुरक्षिताः भवेयुः। लोकसभाम् पूरक-प्रश्नस्य उत्तरे डॉ. जयशङ्करेण उक्तं यत् बांग्लादेशे अल्प-सङ्ख्यकेषु नैकानि आक्रमणानि चिन्ता-विषयकानि वर्तन्ते। अथ च भारतेन बाङ्ग्लादेशस्य अधिकारिणां ध्यानम् अस्मिन् प्रकरणे आकृष्टम् । अपि च उक्तं यत् अस्मिन् सम्बन्धे विदेश-सचिवेन सद्य एव ढाका यात्रा कृता। विदेशमन्त्रिणा प्रोक्तं यत् बाङ्ग्लादेशे भारतस्य साहाय्येन विकास-परियोजनानां भद्रम् ऐतिह्यं वर्तते। अमुना आशा प्रकटिता यत् बाङ्ग्लादेशे नूतन-शासनं परस्परं लाभप्रदं स्थिर- सन्बन्धं च सुनेश्चिष्यति।

## भारतीय संविधानस्य पञ्च-सप्ततिवर्षपूर्तेः भव्य-यात्रायां द्विदिवसीया विशेष-चर्चा प्रारब्धा

लोकसभायाम् भारतीय संविधानस्य पञ्च-सप्तति वर्ष पूर्तेः भव्य-यात्रायां द्विदिवसीया विशेष-चर्चा प्रारब्धा। चर्चायाः प्रारम्भं कुर्वन् रक्षा-मन्त्री राजनाथ सिंहः अवोचत् यत् भारतीय-संविधाने सामाजिकार्थिक-राजनीतिक-सांस्कृतिक-जीवनस्य च समेपि पक्षाः स्वीकृत्य राष्ट्र-निर्माणस्य मार्गः प्रशस्तीकृतः ।

## सुभाषितम्

नाभिषेको न संस्कारः,
सिंहस्य क्रियते वने।
विक्रमार्जितसत्त्वस्य,
स्वयमेव मृगेंद्रता।।

हिन्द्यर्थः- वन्य जीव सिंह का राज्याभिषेक (पवित्र जल छिड़काव) तथा कतिपय कर्मकांड के संचालन के माध्यम से नहीं करते किन्तु वह अपने कौशल से ही कार्यभार और राजत्व को सहजता व सरलता से धारण कर लेता है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्तयर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp number

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः

**हिमसंस्कृतम् प्रकाशनम्**

जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र. पत्रव्यवहारसङ्केतः- १७७१११

## आगामिनि वर्षे महाकुम्भस्य चर्चा सम्पूर्ण विश्वे भविष्यति-प्रधानमन्त्री नरेन्द्र-मोदी



प्रधानमन्त्री नरेन्द्र-मोदी अवोचत् यत् आगामिनि वर्षे महाकुम्भस्य आयोजनम् एकतायाः तादृशः महायज्ञः भविष्यति यस्य चर्चा सम्पूर्ण विश्वे भविष्यति। उत्तरप्रदेशस्य सङ्गम- नगर्याः प्रयागराजे एकां जनसभां सम्बोधयता प्रधानमन्त्रिणा महाकुम्भस्य औपचारिकोद्घाटनमपि कृतम्। अवधेयं यत् महाकुम्भः आगामिनः जनवरी-मासस्य त्रयोदश- दिनाङ्कात् आरभ्य फरवरी-मासस्य षड्विंशतिः दिनाङ्क यावत् भविष्यति। अत्रावसरे प्रधानमन्त्री सार्धपञ्च-सहस्र-कोटि-रूप्यकाणां परियोजनानाम् उद्घाटनम् अकरोत्। आगामिने वर्षे महाकुम्भस्य आयोजनं देशस्य आध्यात्मिक-सांस्कृतिक-परिचयं नूतन-शिखरं प्रतिनेष्यति।

# हिमाचलप्रदेशे सर्वकारीविद्यालयेषु छात्राणां संख्यायां न्यूनता, अस्मिन् वर्षे ५४ सहस्राणि न्यूनप्रवेशाः, प्रतिवेदनस्य उद्घोषणा



**हिमसंस्कृतवार्ताः- डॉ पद्मनाभः, शिमला।**
हिमाचलप्रदेशे शिक्षाक्षेत्रे गुणात्मकविकासस्य शासकीयपक्षाणां मध्ये सर्वकारीविद्यालयेषु प्रतिवर्षं प्रवेशेषु क्षयः दृश्यते। राज्यस्य सर्वकारीविद्यालयेषु गतवर्षस्य तुलनया ५४ सहस्राणि न्यूनप्रवेशाः अभवन्। पूर्वप्राथमिककक्षातः अष्टमकक्षां पर्यन्तं प्रवेशानां यू-डाइस-प्लस प्रतिवेदने प्रकटिताः अङ्काः सर्वकारस्य चिंतां वर्धितवन्तः। शैक्षणिकसत्रे २०२३-२४ सर्वकारीविद्यालयेषु ४.८० लक्षं छात्राणां नामांकनमासीत्। अद्य ५४ सहस्रं क्षयेन नामांकनं ४.२६ लक्षं प्राप्तम्। पूर्वप्राथमिककक्षायां ७१ सहस्रं, प्रथमकक्षातः पञ्चमकक्षां पर्यन्तं २.३६ लक्षं, षष्ठीकक्षातः अष्टमकक्षां पर्यन्तं १.९० लक्षं प्रवेशाः अभवन्।

## अधिकारिणां तर्कः: जन्मदरस्य न्यूनत्वेन प्रवेशाः क्षयिताः।

शैक्षणिकसत्रं २०२४-२५ इति संदर्भ्य प्रकाशितं यू-डाइस-प्लस प्रतिवेदनम् आधारीकृत्य समस्याः परिहार्याः इति चर्चा आरब्धा। शिक्षा- सचिवस्य राकेशकंवरस्य अध्यक्षतायां जिला उपनिदेशकानां सभायाः आयोजनं क्रियते। नवीनसत्रे प्रवेशवृद्धये योजनाः करणीयाः। प्रारम्भिक-शिक्षानिदेशालयः समग्र- शिक्षापरियोजनानिदेशालयश्च प्रतिवेदनं आधारीकृत्य निर्णयानां प्रस्तावं निर्माणे संलग्नः।
प्रतिवेदनस्य अनुसारं पूर्वप्राथमिककक्षायां ७१,७३७, प्रथमकक्षायां २२,१३९, द्वितीयकक्षायां ४७,३५०, तृतीयकक्षायां ५४,३३१, चतुर्थकक्षायां ५७,०९१, पञ्चमकक्षायां ५४,४१०, षष्ठीकक्षायां ६१,७३३, सप्तमकक्षायां ६४,७३२, अष्टमकक्षायां ६४,१०५ छात्राः पठन्ति।
अधिकारिणां मतं यत् सर्वकारीविद्यालयेषु प्रवेशानां न्यूनत्वस्य कारणं केवलं निजीविद्यालयेषु छात्राणां गमनं नास्ति। केचन् विद्यार्थिनः निजीविद्यालयेषु गतवन्तः, किन्तु जन्मदरस्य न्यूनत्वेन अपि प्रवेशाः क्षयिताः।

## जिलानुसारं प्री-प्राइमरीतः अष्टमकक्षां पर्यन्तं छात्रसंख्या

| जिला | कुल छात्राः |
|---|---|
| बिलासपुरम् | २३,२८० |
| चम्बा | ५१,१२५ |
| हमीरपुरम् | २२,९४४ |
| कांगडा | ६१,३३७ |
| किन्नौरम् | ३,५७३ |
| कुल्लूः | ३०,१०० |
| लाहौल-स्पीतिः | १,४५० |
| मण्डी | ५७,६४६ |
| शिमला | ४५,८४० |
| सिरमौरम् | ५०,३०१ |
| सोलनम् | ४६,९९६ |
| ऊना | ३२,२५९ |
| कुलम् | ४,२६,८९१ |




## शिक्षाक्षेत्रे नववर्षात् बहूनि परिवर्तानि दृश्यन्ते- शिक्षामंत्री

२०२३ वर्षस्य तुलनां कृत्वा सर्वकारीविद्यालयेषु ५४ सहस्रं न्यूनप्रवेशाः अभवन्। शून्य-नामांकनम् अथवा पञ्च-नामांकनात् न्यूनाः विद्यालयाः संवृत्ताः। शिक्षकसंस्थानेषु शिक्षकाणां रिक्तानि पदानि पूरितानि सन्ति। छात्राणां गुणवत्तायुक्तं शिक्षां प्रदाय आवश्यकं नवाचारं नवोन्मेषश्च। सर्वकारेण नवीनशैक्षणिकसत्रे विद्यालयानां विषयकः बहवः परिवर्तनाः प्रस्ताविताः।

**-रोहितठाकुरः, शिक्षामन्त्री**

# HP High Court : वैभवमृत्युप्रकरणे हिमाचल-उच्चन्यायालयेन सीबीआई-अन्वेषणस्य आदेशः दत्तः




**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेश-उच्चन्यायालयेन कुल्लूमण्डलस्य तोशेक्षेत्रे वैभवयादवस्य मृत्योः अन्वेषणं सीबीआइ इत्यस्मै समर्पयितुं आदेशः दत्तः। वरिष्ठपुलिसपदाधिकारिभिः कृतस्य अन्वेषणस्य विषये संदेहं प्रकटयन् न्यायालयेन पुलीशाधीक्षकं, सीबीआई शिमलां च अस्मिन् विषये तत्क्षणमेव प्राथमिकी पंजीकर्तुं निर्देशः दत्तः।
कार्यवाहकमुख्यन्यायाधीशस्य तरलोकसिंहस्य न्यायाधीशस्य सत्यनवैद्यस्य च संभागपीठेन डीजीपी-महोदयाय उक्तं यत् सः प्रकरणेन सम्बद्धान् सर्वान् अभिलेखान् त्रिदिनान्तरे सीबीआइ-समित्याः समक्षं समर्पयतु। न्यायालयः सर्वान् अभिलेखान् अन्वीक्ष्य ज्ञातवान् यत् मृतस्य वैभवस्य पिता डीजीपी हिमाचलं प्रति पत्रं लिखितवान् यत् तस्य पुत्रस्य हत्या अभवत् इति । पुलिसैः ज्ञातस्य अपराधस्य करणस्य विषये सूचना आसीत् । तदपि पुलिसैः प्राथमिकी न पञ्जीकृता। न्यायालयस्य आदेशस्य अनुपालनस्य श्रवणं २०२५ तमस्य वर्षस्य मार्चमासस्य ३ दिनाङ्के भविष्यति।
न्यायालयेन गृहप्रधानसचिवं तेषां सर्वेषां पुलिसाधिकारिणां विरुद्धं अन्वेषणं कर्तुं निर्देशः दत्तः ये उपालम्भं प्राप्य प्राथमिकी अपि न पञ्जीकृतवन्तः। न्यायालयेन उक्तं यत् उपालम्भस्य प्राप्तमात्रेण तत्क्षणमेव पञ्जीकरणं कृत्वा प्रकरणस्य अन्वेषणं पुलिसाधिकारिणां दायित्वम् अस्ति। न्यायालयेन ज्ञातं यत् सर्वोच्चन्यायालयस्य संवैधानिकपीठेन ललिताकुमारी बनाम यूपी इति विषये निर्गताः मार्गदर्शिकाः अस्मिन् प्रकरणे न अनुसृताः। श्रवणकाले विभागपीठः पुलिस-अनुसन्धानस्य विषये शङ्कां कृत्वा प्रश्नान् पृष्टवान् यत् पुलिस-सूचना प्राप्तस्य अनन्तरं प्राप्ताः अभिलेखाः किमर्थं न स्थापिताः, डीडीआर-पत्रस्य तत्क्षणं किमर्थं न पञ्जीकरणं कृतम् इति। अस्मिन् विषये पुलिसैः सन्तोषजनकं उत्तरं न दत्तम्।

# HP NEWS : हिमाचलाय ६३.३४ कोटिरुप्यकाणां पर्यटनपरियोजना अनुमोदिता - गजेन्द्रसिंहः शेखावतः

हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।
केन्द्रीयपर्यटनमन्त्री गजेन्द्रसिंहशेखावतः शुक्रवासरे राज्यसभायां सांसद डॉ. सिकंदरकुमारेन पृष्टस्य प्रश्नस्य उत्तरे उक्तवान् यत् पर्यटनमन्त्रालयेन देशे सर्वत्र प्रायः ५ सहस्रकोटिरूप्यकाणां ७६ परियोजनानां अनुमोदनं कृतम्, येषु हिमाचलप्रदेशाय अपि ६३ कोटि ३४ लक्षरूप्यकाणां एका पर्यटनयोजना अनुमोदिता अस्ति। स्वदेशदर्शनयोजना-२ मध्ये हिमाचलप्रदेशस्य पोङ्गजलबन्धः पर्यटनस्थलरूपेण चिह्नितः अस्ति । लाहौल-स्पीति-मण्डलस्य काजा संस्कृति-धरोहर-गन्तव्य-वर्गे, किन्नौर-मण्डलस्य छितकुलस्य च जीवन्त-ग्राम-कार्यक्रम-गन्तव्य-वर्गे चिह्निता अस्ति सिकन्दरकुमारस्य अन्यस्य प्रश्नस्य उत्तरे केन्द्रीयपर्यावरणवनजलवायुपरिवर्तनराज्यमन्त्री कीर्तिवर्धनसिंहः अवदत् यत् वन्यजीवसंरक्षणार्थं हिमाचलप्रदेशाय ७ कोटि ६६ लक्षरूप्यकाणां राशिः स्वीकृता अस्ति। अस्यां योजनायां अवैधमृगयायाः, वन-अग्निरक्षणस्य च निरीक्षकाणां परिनियोजनं भवति । हिमाचलप्रदेशात् गम्भीररूपेण विलुप्तप्रजातीनां विलुप्ततायाः विषये कोऽपि सूचना न प्राप्ता इति अपि सः अवदत्।



# मुख्यमंत्री सुक्खुः आदिष्टवान्, डोडराक्वारं जिलापरिषदक्षेत्रम् अधिसूचितं कुर्यात् विभागः

हिमसंस्कृतवार्ताः - शिमला।
मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः रोहड्रूक्षेत्रस्य दुर्गमक्षेत्रं डोडरा- क्वारम्-इत्येतत् पृथक् जिलापरिषदक्षेत्रं कर्तुं अधिसूचना करणस्य आदेशं कृतवान्। अस्मिन् संदर्भे पंचायतीराजसचिवः शीघ्रमेव अधिसूचनां प्रसारयितुं प्रक्रियाम् आरब्धवान् । अस्य विषये एकदिनद्वयेन वा सूचना निर्गन्तुं शक्यते। मुख्यमन्त्री डोडरा- क्वारस्य भ्रमणकाले एव एतत् घोषितवान् आसीत् । डोडराक्वार् इत्यस्य अनन्तरं शुक्रवासरे मुख्यमन्त्री सर्वकारः ग्रामस्य द्वारकार्यक्रमस्य अन्तर्गतं अन्यं दुर्गमक्षेत्रं कुपवीनगरं गतः।

# भाजपायाः जनाक्रोशसभायै दलेन परिधिगृहे धर्मशालायां निर्मिता रणनीतिः




**हिमसंस्कृतवार्ताः - धर्मशाला।** प्रशासनिकजनपदे कांगड़ायां भारतीय- जनतापार्टीति दलस्य वरिष्ठनेतुः एवं हिमाचलप्रदेशस्य भारतीय-जनतापार्टीतिदलस्य प्रदेशाध्यक्षस्य डॉ. राजीवबिन्दलस्य अध्यक्षतायां परिधिगृहे धर्मशालायां गोष्ठी अभवत्। गोष्ठ्यां कांगड़ा-चम्बायाः भाजपाप्रभारी, पूर्वविधानसभाध्यक्षः एवं विधायकः विपिनसिंहपरमारः, हिमाचलप्रदेशस्य भाजपायाः महासचिवः त्रिलोककपूरः, भाजपाप्रदेशमहासचिवः बिहारीलालः शर्मा उपस्थिता अभवन्। अस्यां सभायां प्रशासनिकजिला- कांगड़ायाः भाजपायाः सर्वे प्रमुखनेतारः कार्यकर्तारः च उपस्थिता आसन्। सत्रे १८ दिसम्बर दिनाङ्के सुक्खुसर्वकारं लक्ष्यीकर्तुं रणनीतिः निर्मिता।
सभायां सर्वाः व्यवस्थाः चर्चिता। अस्मिन्नवसरे हिमाचलप्रदेशस्य भारतीयजनतापार्टीति दलस्य प्रदेशोपाध्यक्षः एवं विधायकः पवनकाजलः, धर्मशालायाः विधायकः सुधीर शर्मा, भाजपायाः प्रदेशप्रवक्ता संजय शर्मा, प्रदेश मीडिया सहप्रभारी अधिवक्ता विश्वचक्षु। जिलाकाङ्गड़ायाः अध्यक्ष सचिन शर्मा एवं अन्ये भाजपा नेतारः कार्यकर्तारः च उपस्थिता अभवन्।

# प्रचुरौषधवाटिकायै ३ मासेषु प्राप्यते विद्युत् जलं च




**हिमसंस्कृतवार्ताः - शिमला।**
उद्योगविभागेन हिमाचलस्य महत्त्वाकांक्षिणः प्रचुरौषधवाटिकायाः समीक्षासभायां नूतनानि लक्ष्याणि निर्धारितानि, यस्य निर्माणं ऊनामण्डलस्य हरोलीक्षेत्रे भविष्यति। भारतसर्वकारेण निर्धारितसमयसीमायाः अन्तः अस्याः परियोजनायाः समाप्त्यर्थं विभागः अस्याः परियोजनायाः निरन्तरं समीक्षां कुर्वन् अस्ति । उद्योगनिदेशकः प्रबन्धनिदेशकः सह मुख्यकार्यकारी च डॉ. युनुस् इत्यनेन निर्देशः दत्तः यत् अस्यां प्रचुरौषधवाटिकायां ३१ मार्च २०२५ इत्यस्मात् पूर्वं विद्युत् जलापूर्तिः स्थले प्राप्तव्या। एतेन सह निविदाभिलेखान् अन्तिमरूपेण निर्धारयितुं सम्बन्धितसंस्थाभ्यः १० दिवसानां समयः दत्तः अस्ति। तदनन्तरं एतानि निविदाभिलेखानि उच्चशक्तिसमित्याः समक्षं स्थापयित्वा अनुमतिः गृहीता भविष्यति। इयं समितिः उद्योगमन्त्री हर्षवर्धनसिंहचौहानस्य अध्यक्षतायां कार्यं करोति । विभागेन एतदपि निर्णयः कृतः यत् स्थलविकासस्य, शून्यद्रवनिर्वहनस्य, सामान्यप्रवाहशुद्धिकरणसंयंत्रस्य च निविदाः २०२५ तमस्य वर्षस्य मार्चमासस्य ३१ दिनाङ्कात् पूर्वं प्लवनीयाः। उद्योगनिदेशकः अवदत् यत् अस्यां परियोजनायां सर्वाणि कार्याणि समयरेखायाः अन्तः सम्पन्नं कर्तुं महत्त्वपूर्णम् अस्ति, यतः आगामिवर्षे एषा परियोजना भारतसर्वकारस्य समयसीमायाः पूर्तिं करिष्यति। अस्यां सभायां एतदपि कथितं यत् अस्याः परियोजनायाः पर्यावरण-निष्कासनं अन्तिमपदे अस्ति, भारतसर्वकारस्य समयसीमायाः पूर्तये शीघ्रमेव एतत् स्वीकृतिं प्राप्तुं आवश्यकम् अस्ति। उद्योगनिदेशकः अवदत् यत् प्रचुरौषधवाटिका हिमाचलसर्वकारस्य एकः बृहत् परियोजना अस्ति, भविष्ये राज्ये भैषज-उद्योगाय महती सहायता भविष्यति। एतेन हिमाचलस्य औद्योगिकविकासस्य गतिः अपि त्वरिता भविष्यति।

# उत्तराखण्डे संस्कृतशिक्षकाणां त्रिदिवसीयप्रशिक्षणशिबिरम् आयोज्यते

**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, हरिद्वारम्।**
उत्तराखण्डराज्ये संस्कृतशिक्षायाः विकासं प्रति समर्पितं त्रिदिवसीयं विशेषप्रशिक्षणशिबिरं १३, १४, १५ दिसम्बरदिनाङ्केषु उत्तराखण्ड- संस्कृत-अकादम्यां हरिद्वारे आयोज्यते। अयं कार्यक्रमः संस्कृतशिक्षामन्त्रिणः माननीय- धनसिंहरावतस्य निर्देशनस्य अन्तर्गतं क्रियते।
अस्मिन् प्रथमचरणे प्रदेशस्य पञ्चाशत् (५०) संस्कृतशिक्षकाणां शिक्षणकौशलविकसनाय, आधुनिकशिक्षणप्रणालीभ्यः परिचयाय, च राष्ट्रीयशिक्षानीतिः- २०२० इत्यस्य अनुरूपं पाठ्यक्रमनिर्माणाय च प्रशिक्षणं प्रदास्यते। अस्य कार्यक्रमस्य नेतृत्वं उत्तराखण्डसंस्कृत-अकादम्याः सचिवः डॉ. वाजश्रवा आर्यः करोति। प्रमुखप्रशिक्षकस्य रूपेण डॉ. चान्दकिरणसलूजा शिक्षकेभ्यः आधुनिकशिक्षणतन्त्राणां विषये प्रशिक्षणं प्रदास्यति।

## कार्यक्रमस्य प्रमुखवैशिष्ट्यम्

१. संस्कृतशिक्षकाणां शिक्षणकौशलस्य अभिवृद्धिः।
२. राष्ट्रीयशिक्षानीतिः-२०२० इत्यस्य अनुरूपं पाठ्यक्रमस्य विकासः।
३. आधुनिकशिक्षणप्रणालीभिः शिक्षकेभ्यः परिचयः।
४. संस्कृतशिक्षायाः प्रभावित्वं छात्रोपयोगिताञ्च वर्धयितुं प्रयासः।

## विशेषज्ञानां भूमिका

डॉ. चान्दकिरणसालूजा, यः आधुनिकशिक्षणतन्त्रे विशेषं कौशलं धारयति, अनेन प्रशिक्षणशिबिरेण शिक्षकेभ्यः उपयोगीमार्गदर्शनं करिष्यति। शिक्षकाः अस्य प्रशिक्षणस्य माध्यमेन न केवलं स्वस्य कौशलं वर्धयिष्यन्ति, अपि तु छात्रेषु संस्कृतभाषां संस्कृतिं च प्रति रुचिं जागरयिष्यन्ति।

## उत्तराखण्डस्य

### शासनस्य नवप्रयासः

संस्कृतशिक्षायाः उन्नतिं प्रति उत्तराखण्डशासनस्य प्रयासः अत्यन्तं प्रशंसनीयः अस्ति। संस्कृतशिक्षामन्त्रिणः डॉ. धनसिंहरावतस्य तत्त्वावधाने अयं कार्यक्रमः संस्कृतभाषायाः प्रचार-प्रसारं च शिक्षकेभ्यः कौशलवर्धनं च साधयिष्यति।

## भविष्ये योजनाः

शासनं प्रशिक्षणशिबिरस्य सफलतां दृष्ट्वा प्रदेशे अन्येषां संस्कृतशिक्षकाणां कृते अपि एवम् अभ्यासक्रमान् आयोजयिष्यति। अनेन प्रयासेन संस्कृतभाषायाः संरक्षणं प्रचलनं च सम्पादयितुं शक्यते। अस्मिन् शिबिरेण संस्कृतशिक्षायाः नूतनदिशा प्राप्यते, या छात्रेषु च गहनं प्रभावं जनयिष्यति।

# सशक्त-आत्मबलेनैव व्यसनपरक-समस्यायाः समाधानं भवितुमर्हति





हिमसंस्कृतवार्ताः- डॉ. मूलचन्द्रशुक्लः रामनगरम्। पीएनजी राजकीय- स्नातकोत्तर- महाविद्यालय- रामनगरद्वारा प्राचार्य प्रो. एम. सी. पाण्डेवर्यस्य दिशानिर्देशने मदमुक्ति- अभियानं सञ्चाल्यते। मदमुक्तभारत- अभियानस्य व्यसनमुक्त- उत्तराखण्ड- अभियानस्य च सन्दर्भे महाविद्यालयएण्टी ड्रग सेल इत्यस्य संयोजिका डॉ. जया भट्ट द्वारा विद्यालयस्य विद्यार्थिभ्यः व्यसनमुक्त- अभियानार्थं जागरूकः क्रियते। महाविद्यालयस्य एण्टी ड्रग सेल द्वारा रामनगरस्य एमपी हिन्दू इण्टर कालेज इत्यत्र जागरूकता- कार्यशालायाः समायोजनं विहितम्। जागरूकताकार्यशालायाः प्रथम- सत्रे नोडल अधिकारी डॉ. जया भट्टः द्वादशकक्षायाः विद्यार्थिभ्यो विविधोदाहरणैः प्रोजेक्टर- माध्यमेन व्यसन- पदार्थादिभ्य उत्पन्न- कैंसर इत्यादिभिः, मार्गादिषु सङ्घट्टनमित्यादिभिः (दुर्घटना), आर्थिकहानि- इत्यादिभिश्च सह तेभ्यो विभिन्नदुष्परिणामादिभ्यः परिचिनोति। अग्रे तया युवानः व्यसनपरकपदार्थादिभ्यः आत्मानं दूरीकृत्य सशक्त-आत्मबलेन जीवननिर्वाहार्थं प्रेर्यन्ते। महाविद्यालयस्य योगवैकल्पिक- चिकित्साविभागीयः प्राध्यापकः डॉ. नितिन ढोमने महोदयः सुपर ब्रेन योगद्वारा सक्षम- आत्मबल- निर्माणार्थं छात्राछात्रान् शिक्षयति। कार्यशालायाः द्वितीयसत्रे दशमकक्षायाः विद्यार्थिनः व्यसनमुक्त- अभियानार्थं प्रशिक्षिताः। कार्यशालायां प्रश्नोत्तरमाध्यमेन मद-अकरणाय विद्यार्थिनः जागरूकीकृताः। अस्मिन्नवसरे राष्ट्रियसेवायोजनायाः वरिष्ठ- कार्यक्रम- अधिकारी डॉ. सुरेश चन्द्रा, इतिहासविभागस्य च डॉ. नरेश कुमारः तत्र उपस्थतौ आस्ताम्। तत्र समेऽपि विद्यार्थिनः मदमुक्ति इत्यस्य शपथं नीतवन्तः।एमपी हिन्दू इण्टर कालेज इत्यस्य प्रधानाचार्यः संजीवकुमारशर्मावर्येण व्यसनमुक्तिसन्दर्भे स्ववक्तव्यं प्रदाय धन्यवादो विज्ञापितः। स्ववक्तव्ये तेन समस्तशिक्षकाः विद्यार्थिनश्च ई- शपथग्रहणाय प्रेरिताः।

## ।। श्रीरामायणकथा ।।




### उत्तरकाण्डम्!
### (पञ्चचत्वारिंशः सर्गः)
**लवणासुरवधार्थं शत्रुघ्नं प्रति रामस्य आदेशः**
### (तृतीयः खण्डः)

तथा उक्ते कृताञ्जलिः रामः तानृषीन् प्रत्यवदत् हे ऋषयः! लवणस्य आहारः आचारश्च कीदृशः, सः च क्व वर्तते? राघवस्य वचः श्रुत्वा ऋषयः अब्रुवन् हे राम! लवणस्य आहारस्तु सर्वसत्त्वानि विशेषेण तु तापसाः। तस्य आचारः सततं रौद्रता, मधुवने तस्य निवासः। सः नित्यं मनुष्यान् व्याघ्रसिंहमृगाणां च बहुसहस्राणि हत्वा आहारं करोति। तच्छ्रुत्वा राघवः तान् मुनीन् वाक्यमब्रवीत् युष्माकं भयं नास्ति, अहमेव तं राक्षसं घातयिष्यामि। रामचन्द्रः एवं तेषां मुनीनामुग्रतेजसां पुरतः प्रतिज्ञाय भ्रातॄन् अब्रवीत् - कः वीरः लवणस्य हन्ता भविष्यति ? महाबाहोः भरतस्य धीमतः शत्रुघ्नस्य च मध्ये कस्यांशः सः विधीयताम्। राघवेण एवमुक्तः भरतः तदा वाक्यमब्रवीत्- अहमेनं हनिष्यामि, सः ममांशः भवेत्। भरतस्य धैर्यशौर्यसमन्वितं वचः श्रुत्वा लक्ष्मणानुजः शत्रुघ्नः सौवर्णमासनं हित्वा नराधिपं रामं प्रणिपत्य वाक्यमब्रवीत् हे राजन्! पुरा यदारभ्य त्वया अयोध्या त्यक्ता तदारभ्य तव आगमनपर्यन्तम् एषः महाबाहुर्मध्यमः रघुनन्दनः हृदये सन्तापं कृत्वा इमाम् अयोध्याम् अपालयत्। एषः महायशाः नन्दिग्रामे जटां धृत्वा दुःखशय्यासु शयानः फलमूलानि अशित्वा बहूनि दुःखानि अन्वभवत्। अतः हे राजन्। मयि स्थिते एषः महायशाः पुनः क्लेशं न आप्नुयात्। तथा ब्रुवति शत्रुघ्ने रामः पुनरब्रवीत् हे काकुत्स्थ! एवमेव भवतु, त्वमेव मम आदेशस्य पालनं कुरु। मधोः शुभे नगरे त्वाम् अभिषेक्ष्यामि। हे महाबाहो! भरताय क्लेशं प्रदातुं यदि नेच्छसि तर्हि सः अत्रैव तिष्ठतु। त्वं तत्र शिबिरं स्थापय यतः त्वं शूरः कृतविद्यश्च निवेशने च समर्थः। त्वं पापनिश्चयं मधुसुतं लवणं हत्वा तद्राज्यं धर्मेण प्रशाधि। हे शूर! मम वाक्यान्तरे उत्तरं न वक्तव्यम्। एवमुक्त्वा रामः वसिष्ठप्रमुखैर्विप्रैर्विधिमन्त्रपुरस्कृतं जलं शत्रुघ्नाय दत्वा अब्रवीत् हे काकुत्स्थ! ममोद्यतम् अभिषेकञ्च त्वं प्रतीच्छ।



हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

## प्रथमे दिवसे एव डोनाल्ड ट्रम्पेन जन्माधारितनागरिकता विलुप्यते

*हिमससम्कृतवार्ताः, ईदरधीरजः।* डोनाल्ड ट्रम्पेन आश्वस्तं यत् स्वाभियाने आप्रवासननिर्बन्धम् अधिकृत्य कृतस्य वचनस्य अनुसारेण स्वस्य पदग्रहणात् परं यथाशीघ्रमेव जन्माधारितनागरिकता विलुप्यते। विवादास्पदः प्रस्तावः अयम् वाञ्छति यत् मातापित्रोः आप्रवासनस्थितिम् अवगणय्य अमेरिकाभूमौ जातस्य कृते नागरिकताप्रदानस्य चिरकालिनी अमेरिकीया परंपरा विलुप्यते। अमेरिकीय-संविधानस्य चतुर्दशसंशोधने प्रतिष्ठिता इयं नीतिः पञ्चाशदुत्तरैकशतस्य अधिकान् वत्सरान् यावत् प्रवर्तते। उपायः अयं मूलतः पूर्वदासानां, तेषां वंशजानां कृते नागरिकताप्रदानार्थम् उपकल्पितम् आसीत्। भावि-राष्ट्रपतिना ट्रम्पेन कथितं यत् नीतिः इयं "जन्मपर्यटनम्" प्रोत्साहयति यतोहि गर्भवत्यः केवलम् अपत्यम् अमेरिकीनागरिकतां प्रापयितुम् अमेरिकां प्रविशन्ति। यद्यपि प्रथमे कार्यकाले ट्रम्पेन विषयः उत्थितः तथापि महत्त्वपूर्णं कार्यं न कृतं जन्माधारितनगरिकतां समापयितुम्। यद्यपि ईदृशः पदक्षेपः न्यायरूपान् संवैधानिकान् विघ्नान् सम्मुखीकुर्यात् तथापि अस्मिन् अवसरे भावि-राष्ट्रपतिः ट्रम्पः शीघ्रतया कार्यं कर्तुं कृतनिश्चयः।

## धारावाहिकं गीताप्रश्नोत्तरम् -८७

✍असमप्रदेशीयः नारदोपाध्यायः

### (सप्तदशोऽध्यायः प्रारभ्यते)

अर्जुनः- हे प्रभो! ये मनुष्याः यदि शास्त्रविधिम् अजानन्तः एव भक्तिपूर्वकं पूजनं कुर्वन्ति, तर्हि तेषां निष्ठा का? सात्त्विकी उत राजसी, अथवा तामसी?
श्रीकृष्णः- एताः मनुष्याणां स्वभावजाः त्रिविधाः श्रद्धाः कथ्यन्ते। यस्य स्वभावः यादृशः, तादृशः हि तस्य निष्ठाजन्यः गुणः भवति। सत्पुरुषाणां निष्ठा सात्त्विकी, राजसिक-पुरुषाणां राजसी, एवञ्च तामसिक-पुरुषाणां निष्ठा तामसी भवति इति विद्धि।
अर्जुनः- भगवन्! स्वभावजा श्रद्धा त्रिधा इति कथम्? मया सम्यक् नावगतम्।
श्रीकृष्णः- अहो, भारत! मनुष्येषु प्रत्येकं मनुष्यस्य श्रद्धा तस्य अन्तःकरणस्य अनुरूपा भवति। अयं मनुष्यः श्रद्धामयः अस्ति। अतः यस्य यादृशी श्रद्धा, सः तादृशः एव, अर्थात् तथैव तस्य निष्ठा, स्थितिः वा भवति।
अर्जुनः- तर्हि भगवन्! तस्याः श्रद्धायाः परीक्षणं कथं, केन वा प्रकारेण कर्तुं शक्यम्?
श्रीकृष्णः- तत्परीक्षणं सहजम् अर्जुन। पश्य, सात्त्विकाः मनुष्याः देवान् पूजयन्ति, राजसाः यक्षरक्षांसि यजन्ते, तामसाः जनाः च भूतप्रेतान् यजन्ते, इत्येवं कः कीदृशः स्यादिति परीक्षणं भवति।
अर्जुनः- तर्हि अश्रद्धावतां जनानां परीक्षणं कथं भगवन्?
श्रीकृष्णः- अर्जुन! ये अश्रद्धावन्तः मनुष्याः, ते दम्भेन, अहङ्कारेण, कामनया, आसक्त्या, हठेन च समन्विताः सन्तः, शास्त्रविधिरहितं घोरं तपश्चरणं कुर्वन्ति। स्वकीयं पाञ्चभौतिकं शरीरं सम्पीड्य, तेषाम् अन्तःकरणे स्थितं मामपि ते क्लेशयन्ति। एतादृशान् मनुष्यान् त्वम् आसुरस्वभाववतः जानीहि इति, शम्।(गी०- १७/०१-०६) (अनुवर्तिष्यते)

## पहाड़ी गल्लां

हिमसंस्कृतवार्ताः

# दिला रे जख्म किसजो दसिये

माणुये री ज़िन्दगी बी अई कितनी अजीब
किस बिछड़ना कने किसने हुणा मेल
जितना मर्ज़ी जोर लगाई लो
एह सब तां हया नसीबाँ रा खेल

घरा च कोई बी जे सुख दुख हो तां
हर कोई चाहन्दा अपणेयां रा साथ
पर जे कोई अपणा प्यारा बिछड़ी जाए
तां मन हुई जांदा बौहत उदास

बिछड़े रियाँ यादां नी भूली सकदा कोई
पावें जितना होए दिला रा कठोर
कलाह बैठी कने सै बी रोंदा
पावें बाहरा ते दिसे कुछ होर

कुछ एहड़े हुंदे सैजे रहन्दे उदास
कुछ एहड़े हुंदे सैजे छड्डदे नी आस
दिला रे जख्म किसी जो दसी बी नी सकदे
याद नी भूलणी तदुआं तिक जे अई स्वास

जिंदगियां च कुछ बी हुई जाए
कुछ अलग करना जरूर
एहड़ा ही इक्क माहणु है
तीसरा नावँ आ पवन बरूर

बड़ा खुश था पूरा परिवार
बच्चेयाँ री थी ठीक चलिरि पढ़ाई
इक दिन सवेरे सवेरे ही
एहड़ी मनहूस खबर आई

तिसे जे सारा परिवार
यार दोस्त,कने रिश्तेदार दिते हिलाई
बेटी नेहा रा हुई गया एक्सीडेंट
हॉस्पिटल दिति थी पूजाई

डाक्टरें बथेहरा जोर लगाया
पर नी सके बचाई
अनहोनी एहड़ी घटी
किसीजो समझ नी आई

नेहा रे जाणे ते
सारा परिवार था परेशान
भगवान भी ल्या करां था
तिन्हारा इम्तिहान

कुछ दिन लगे संभलने जो
एक नई मुहिम दिति चलाई
नेहा रे नावां ते
नेहा मानव सेवा समिति दिति बणाई

गरीबां री सेवा जो एह
समिति रहन्दी हमेशा त्यार
हुणा तक ईसा रे सदस्य
हुई गए आठ सौ पार

नेहा री इक थी इच्छा
भई बृद्धाश्रम बनाणा
सै इच्छा रही गई थी अधूरी
पर पवन बरूर ने समिति
बणाई कने सै इच्छा बी करिती पूरी

जे कुसी गरीबा जो
सहायता री हो लोड़
पूरी मदद करनी इन्हां
तां तुहें समितिया जो दसा छोड़

लोकां री सेवा करने जो
करना असां इक्क कम्म
हत्था च हत्थ पकड़ी कने
कठेयाँ हुई कने चलणा हरदम

कल्ला कुछ नी करी सकदा
सब कट्ठे हुई कने चला
मेरी सबीं ने बिनती
ताहिं हुणा मानवता रा भला




रविंदर कुमार शर्मा. घुमारवीं
जिला बिलासपुर हि प्र
7018853800

हिमसंस्कृतवार्ताः, डॉ. विवेक शर्मा, जोगिन्द्रनगरम्

## सामान्यज्ञानम्

प्रश्नः 1. भारते महाकालेश्वरमन्दिरम् कुत्र अस्ति?
उत्तरम् : उज्जैन (मध्यप्रदेशप्रान्ते)
प्रश्नः 2. 'काव्यालंकारः' इत्यस्य रचयिता कः अस्ति?
उत्तरम् - 'भामहः'।
प्रश्नः 3. सर्वाति विशालः द्वीपः कः अस्ति?
उत्तरम्- सर्वाति विशालः द्वीपः 'ग्रीनलैण्ड्' इति अस्ति।
प्रश्नः 4. 'कॉफी' इत्यस्य सर्वाधिकः उत्पादकः देशः कः अस्ति?
उत्तरम्- 'कॉफी' इत्यस्य सर्वाधिकः उत्पादकः देशः 'ब्राजीलः' अस्ति।
प्रश्नः 5. एकवयस्कमनुष्यस्य शरीरे कति अस्थयः भवन्ति?
उत्तरम्- एकवयस्कमनुष्यस्य शरीरे 206 अस्थयः भवन्ति।

## "लौकिकन्यायकोशः" "अजाकृपाणीयन्यायः"

अजायाः कृपणस्य च अचिन्तितः अपि संबन्धः जातः चेत् अजा मृता भवति एव। यदा काचिद् घटना अनपेक्षितरीत्या घटते तदा तस्याः निर्देशं कर्तुम् अयं न्यायः उपयुक्तः भवति। अकस्मात् सहसा जायमानानां घटनानां कृते अस्य उपयोगः।अयम् एव अर्थः काकतालीयन्यायेन खल्वाट- बिल्वीयन्यायेन च बोध्यते। अन्यस्मिन् न्याये इष्टलाभः अनिष्टलाभः वा सूच्यते परन्तु अनेन न्यायेन अनिष्टप्राप्तेः एव सूचना भवति।

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्